## सर्वपुरुषाभ्यां णढञौ। (१०/१६७२)

सर्वपुरुषाभ्यां यथासङ्ख्यं णढञौ प्रत्ययौ भवतः तस्मै हितम् इत्येतस्मिन् [1]विषये। छस्यापवादः। सर्वस्मै हितम् सार्वम्। पौरुषेयम्।

[५००] सर्वाण्णस्य वा वचनम्। (म. भा. २. ३४१)

[2]सार्वम्, सर्वीयम्।

[५०१] पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम्। (म. भा. २. ३४१)

पौरुषेयो वधः, पौरुषेयो विकारः, पौरुषेयः समूहो वा। [3]तेन कृते पौरुषेयो ग्रन्थः॥

## माणवचरकाभ्यां खञ्। (११/१६७३)

माणवचरक[4]शब्दाभ्यां खञ् प्रत्ययो भवति तस्मै हितम् इत्येतस्मिन् [5]विषये। छस्यापवादः। माणवाय हितम् माणवीनम्। चारकीणम्॥

## तदर्थं विकृतेः प्रकृतौ। (१२/१६७४)

प्रकृतिः उपादानकारणं, तस्यैव उत्तरमवस्थान्तरं विकृतिः। विकृतिवाचिनः प्रातिपदिकात् [6]प्रकृतावभिधेयायां यथाविहितं प्रत्ययो भवति। [7]तदर्थमिति प्रत्ययार्थविशेषणम्। तद् इति सर्वनाम्ना विकृतिः परामृश्यते। विकृत्यर्थायां प्रकृतौ प्रत्ययः। तदर्थग्रहणेन प्रकृतेरनन्यार्थताख्यायते। न प्रकृतिविकारसम्भवमात्रे प्रत्ययः, किं तर्हि, प्रकृतेरनन्यार्थत्वे विवक्षिते। प्रत्ययार्थस्य च तदर्थत्वे [8]सति सामर्थ्याल्लभ्या चतुर्थी समर्थविभक्तिः। केचित्तु 'तस्मै हितम्' (५.१.५/१६६५) इत्यनुवर्तयन्ति। अङ्गारेभ्यो [9]हितानि एतानि काष्ठानि अङ्गारीयाणि [10]काष्ठानि। प्राकारीया इष्टकाः। शङ्कव्यं दारु। पिचव्यः कार्पासः। तदर्थम् इति किम्? यवानां धानाः[11]। धानानां सक्तवः। प्रकृत्यन्तरनिवृत्तिरत्र विवक्षिता न तादर्थ्यम् [12]धानानां सक्तवः, न लाजानाम् [13]इति। विकृतेः इति किम्? [14]उदकार्थः कूपः। विकृतिग्रहणेऽक्रियमाणे या काचित् प्रकृतिर्गृह्यते, नोपादानकारणमेव। भवति च कूप उदकस्य प्रकृतिः, तत्रोत्पादनात्। न तु उदकं [15]तस्यः विकृतिः, [16]अत्यन्तभेदात्। प्रकृतौ इति किम्? [17]अस्यर्था कोशी। असिरयसो विकृतिर्भवति, न तु कोशी तस्य प्रकृति[18]र्भवति। द्वयोरपि प्रकृतिविकृत्योर्ग्रहणे [19]विवक्षितः [20]प्रकृतिविकारभावो लभ्यते॥

---

1. अर्थे क. फ. 2. सार्वम् नास्ति ह. 3. तत्कृते ब. 4. इत्याभ्याम् इत्यधिकम् क. 5. अर्थे क. फ. ह. 6. प्रकृताभिधेयानां ड. फ. 7. तदर्थमिति नास्ति ह. 8. सति नास्ति क. फ, सामर्थ्यलभ्या क. ह. 9. हितानि नास्ति ब. फ. 10. काष्ठानि नास्ति ह. 11. न व्रीहीणाम् इत्यधिकम् क. 12. यवानां धानाः न व्रीहीणाम् क. 13. इति नास्ति क. 14. उदकार्थं क. 15. तस्य नास्ति क. 16. अत्यन्तभेदः क. 17. असिकोषी क. 18. भवति नास्ति फ. ह. 19. क्रियमाणे इत्यधिकम् क. ड. फ. 20. प्रकृतिविकृतिभावः ह.